राजः करं जनेभ्यः आप्नुवन्ति ।

कन्याः ! न्यग्भ्यो वृक्षेभ्यः पुष्पाण्यपचिनुत ।

ऋत्विजो यागेष्विष्टकाश्चिनुयुः ।

मातुलेयः पैतृष्वस्रीयस्य कन्यामवृणोत् ।

बधिराः श्रोतुन्न शक्नुवन्ति ।

पक्षिणः पक्षौ विस्तृण्वते, धुन्वन्ति च ।

दातुं धनं सञ्चिनु, यशश्चाश्नुष्व ।

राममानेतुमन्वञ्चन्दूतं दशरथः प्राहिणोत् ।

मेघा[1] विभ्राजमपि सूर्यं स्तृणन्ति ।

रामः प्राग्विश्वामित्राञ्चित्राः कथा अशृणोत् ।

भृङ्गो दुराचारेण मनो मादुन्वन्तु ।

तिरश्चान्नृणाञ्च भेदमाचार्यो विवृणोति स्म ।

यथा वत्सा गां विचिन्वन्ति तथा योगिन[2] आत्मानम् ।

उदीचां कार्याण्युद्यमेन साध्नुवन्ति ।

III.

Experts in cutting cut the wood with an axe (दो)।

Karnams send the order of the king to the subjects.

Girls searched for a ball that was lying (तिर्यङ्) under the leaves in the garden.

The smiths open (अपावृ) the box with the key.

Sudras extract toddy (सु) from Palmyra trees.

---

(1) Visarga preceded by आ and followed by a vowel or a soft consonant, is dropped.

(2) Visarga is also dropped when preceded by अ and followed by any vowel except अ.

Servants shut (**आवृ**) the door of the palace.

Husband's advice is obeyed (**श्रु**) by a woman.

When (**यदा**) the sun is covered with the moon, (**तदा**) there is eclipse.

III.

Give the Acc. Pl. of **तिर्यङ्** , **अन्वङ्** and **सध्र्यङ्**।

Give the Loc. Pl. of **विभ्राक्** and **भुत्** ।

When does **उ** of **नु** drop ? Give an instance.

Give the Infinitive of purpose of the 5th conj. roots.

How many kinds of Indeclinables are there ?

IV.

Read and give the meanings of :—

अंसः	अधरः	कटिः	क्षवथुः
अक्षि	अवयवः	कण्ठः	क्षुतम्
अङ्गुली	अस्थि	कनिष्ठिका	चिबुकम्
अङ्गुलीयकम्	उदरम्	कपालः	जानु
अङ्गुष्ठः	ऊरु	कर्णः	जिह्वा
तर्जनी	भ्रूः	सिरा	ओष्ठः

त्वक्	मनः	हस्तः	केशः
दन्तः	मुखम्	हिक्का	जृम्भा
नखः	ललाटम्	भुजः	पादः
शिखा	पृष्ठम्	सक्थि	

LESSON IX.

8th Conjugation.

कृ to do.

तनु to stretch, to do, to spread.

तृण् to eat grass.

मन् to know, to think.

वन् to beg.

सन् to give, to offer.

1st Conjugation.

नी to lead or carry.

तप् to heat or grow hot.

मन्थ् to churn, to be agitated.

रम् to sport.

लभ् to get.

वद् to speak.

गल्भ् with प्र to swagger.

2nd Conjugation.	*10th Conjugation.*
दुह् to milk.	मन्त्र् with नि to invite.
स्ना to bathe.	चुद् to drive.
पा to protect.	

The sign of the 8th conj. is उ (strong.)

कृ 'to do' assumes the form कुरु before the weak verbal endings : कुरुतः।

उ is necessarily dropped in the case of कु before a termination beginning with व्, म् and य् : कुर्वः, कुर्मः, कुर्यात्।

दुह् is conjugated as दिह् of 2nd conj.

The substitutes of यज्, वह्, वद्, वस्, ह्वे and वे are इज्, उह्, उद्, उष्, हु and उ respectively before the weak one : इज्यते, उतम् etc.

The Indeclinable of past participle (gerund) or absolutive is formed by adding त्वा (weak) to the root : भूत्वा।

When a preposition is prefixed to the roots, य is substituted for त्वा : अनुभूय।

त् is prefixed to this य when the root ends in a short vowel : एत्य, विजित्य।

After सेट् root त्वा takes an augment इ as a general rule : शयित्वा।

EXERCISES.

I.

ईशः	दिक्	रथः	पूषा
कवचम्	निधिः	व्याघ्रः	वृत्रहा
कुण्डलम्	पाण्डवः	शुक्लः	मघवा
कुबेरः	प्राणः	मघवान्	युवा
गमनम्	मृगया	अर्वा	दश
नव	पन्थाः	यः	पञ्च
मन्थाः	सः	सप्त	प्रशान्
अहम्	अष्ट	एषः	त्वम्
ऋभुक्षाः	कः	अयम्	असौ

पूषा सुतं कुण्डलं कवचमवनुत[1] ।
यस्सत्ये पथि चरति स श्रेयो[2] लभते ।
पञ्च प्राणा हृदि सञ्चरन्ति ।

(1) There are some roots that govern two Accusatives. The synonyms of these govern two. रुध् याच् प्रच्छ् वन् नी are instances.

(2) सः and एषः drop the finals स् or Visarga when followed by a consonant in a sentence : स पुरुषः ; एष शिवः ।

अहं वृत्रघ्नो[1]ऽर्वन्तं शुक्लम्मन्वे ।

असौ व्याधोऽष्टाभिश्श्वभिस्सह[2] मृगयायै गच्छति ।

लोके क्षामः प्रशानस्तु ।

श्राद्धे युवानान्विँप्रान्निमन्त्रयेथाः ।

भोः ! [3] कोऽत्र पठति ।

यथा मेघो वर्षेत् तथा मघवा करोतु ।

दुग्धे स्म गां स यज्ञाय सस्याय मघवा दिवम् ।

पञ्च पाण्डवा ऋभुक्षाणमपूजयन् ।

त्वं मन्थानमानय, एषा रज्जुमानयतु ।

पूष्णो रथस्य सप्तार्वन्तः ।

विद्या दशसु दिक्षु कीर्तिं वितनोति ।

नवानान्निधीनामीशः कुबेरः ।

II.

The greater the intensity of the sun, the greater will be the downpour of rain.

Guru hails (तन् स्वस्ति) Indra, his pupil.

---

(1) अ following a word ending in ए or ओ is dropped.

(2) सह governs the Instrumental.

(3) भोस् drops its स् when followed by a vowel or a soft consonant.

The Creator has kept poison in the mouth of the snake, in the tails of the scorpion, and in the hearts of the wicked.

I think of entrusting my son, the young prince, with the kingdom.

Having obtained the permission of Vasishta, Dasaratha agreed to Rama's going to forest with Visvamitra.

Rama, having killed Ravana, regained (**प्रत्यानी**) Seeta.

Clean your body by bathing.

The gods making manthara (**मन्थर**) mountain a churning handle, and the snake a rope, churned the ocean.

Let us two speak for some time.

He is born to protect the world.

Thou swaggerest in vain.

III.

Give the Instr. pl. of **अष्टन्, ऋभुक्षिन्, अदस्।**

How are the Indeclinable past participles formed ?

Give the Potential mood of **कृ** and **मन्।**

Conjugate fully in conjugational tenses.

Make a sentence using **वद्**, **वह्** and **यज्** in the Passive Voice.

IV.

Read and give the meanings of :—

अब्धिः	कल्लोलः	जलूका	नक्रः
अरित्रम्	कावेरी	तीरम्	निपानम्
आवर्तः	कुल्या	त्रिका	नेमिः
कर्णधारः	गङ्गा	दीपः	पल्वलम्
पीनाहः	प्रवालं	मुक्ता	शिक्यम्
पुलिनम्	बिन्दुः	वेला	शुक्तिः
फेनः	बुद्बुदः	वालुका	सिकता
प्रणाली	मत्स्यः	वीरुधः	सेतुः
	स्नानं	ह्रदः	

LESSON X.

Roots of the Ninth Conjugation.

अश् to eat.

कॄ (कृ) to kill.

क्री to buy.

क्षुभ् to be agitated.

ग्रन्थ् (ग्रथ्) to work, to arrange, to put together.

गॄ (गृ) to speak.

ग्रह् (गृह्) to take, to catch ; with अनु to bless.

ज्ञा (जा) to know ; with अनु to permit.

पुष् to nourish, to keep.

पू (पु) to purify.

बन्ध् (बध्) to tie, to fasten ; with निर् to importune.

मुष् to steal.

ली (लि) to melt, to be dissolved, to be absorbed.

लू to cut, to lop off.

वॄ (वृ) to choose, to ask, to beg.

स्तॄ (स्तृ) to cover ; with वि to spread ; with नि to clear debt.

The sign of the 9th conj. is ना (weak).

आ of ना becomes ई before the weak terminations beginning with consonants : क्रीणीतः ।

But this is dropped when it is followed by an initial vowel of a weak termination : क्रीणन्ति ।

आन is placed instead of हि or धि when roots end in a consonant: अशान।

The terminations of the potential passive participle are तव्य, अनीय and य (strong).

This is Passive when the verb is transitive, and Impersonal when the verb is intransitive.

तव्य admits इ in the case of सेट् roots: भवितव्यम्।

The ending आ is changed to ए before this य: देयम्।

Roots ending ऋ change it to its vriddhi except in certain cases: कार्यम्।

If roots end in consonant the penultimate अ is lengthened before this य (except in some cases.)

To form the present participle, the conj. sign is first affixed to the root, and then the termination अत् is added on to it, when the root takes Parasmaipada; and मान when it takes Atmanepada.

Before this अत् the preceding अ is dropped. In the second group मान becomes आन।

EXERCISES.

I.

अध्वर्युः कन्या गच्छन् दुर्भिक्षः
अरिः कायः तत्वम् दुहन्
अर्थः कालः तस्करः दिव्यम
असुरः कृषीवलः तीर्थम् धान्यम्
नीतिः ब्राह्मणः वत्सः सन्ततिः
पण्यम् भीतः वरं सा
पाणिः महान् विपणिः सुवर्णम
पापः मूषा वेदिः स्तम्भः
दर्भः पावकः मोक्षः व्यायामः
या श्रेयान् उशना अनड्वान्
चत्वारः षट् अनेहा विश्ववाट्
सा दोः दधृक् पुमान् तुराषाट् ध्रुक्

मणिकारो मूषायां सुवर्णं निक्षिप्य विलिनाति ।
(1)दुहि गां दुहति सति वत्सं स्तम्भे बधान ।
(2)पश्यतां जनानां तस्करो द्रव्यं मुष्णाति ।

(1) This is an instance of the Locative absolute.

(2) This is an instance of the Genitive absolute; it has the sense of 'notwithstanding.'

चतुरोऽनड्डुहश्शकटेऽबध्नाम् ।

अस्मिन्महति दुर्भिक्षेऽनेहसि कथमश्नामेति क्षुभ्नन्ति जनाः ।

तुराषाट्[1]ध्रुग्भ्योऽसुरेभ्यो भीतो विश्वौ हि वरमवृणीत।

व्यायामे न दोषः, कायस्य च बलं पुष्णाति ।

पावकस्तीर्थं ब्राह्मणाश्च पापिनं पुनन्ति ।

उशना यां नीतिमग्रथ्नात्तया राज्यस्य तत्त्वं जानीहि ।

चतुर्षु पुंसोऽर्थेषु मोक्ष एव श्रेयान् ।

दधृक् पुमान्[2] षडरीन् कृणाति ।

गच्छता कालेन कृषीवला धान्यानि लुनीयुः ।

विपणिषु जनाः पण्यानि क्रीणन्ति विक्रीणते च ।

प्रीणन्ति पितरस्तस्य यस्सन्तत्यै कन्यायाः पाणिं गृह्णाति ।

अध्वर्युर्वेदिं दर्भैरास्तृणाति ।

II.

Keep a cat if rats steal the eatables.

---

(1) If a letter of the lingual class comes at the end of a word, the following dentals, except the nasals in नवति, नगरी, and नाम् do not substitute the corresponding linguals.

(2) Dentals followed by ष् do not substitute the corresponding linguals.

(In receiving gifts) a cow should be received by its tail, a maid servant by her tuft, and a Brahmin girl by her hand.

It is time to take meals; get up, and let us take meals.

If bulls are not able to drag the cart, yoke horses.

If you please God, He will bless you.

Where there is smoke, there is fire.

Though he is poor, yet he is honest.

Kaikeyi urged Rama to go to the forest.

Behold a deer running from garden to garden!

After happiness comes misery, and after misery comes happiness.

III.

Give the Voc. Sing. of **उशनस्** and **पुमान्।**

Give the Loc. Sing. of ध्रुक् and **दधृक्।**

Form the Indeclinable past participles from roots of the 9th conjugation.

Form the Present participle adjectives from the roots **ज्ञा, लू, दिश्, गम्, भा** and **चुर्।**

Make a sentence using the Potential passive participle of root **बन्ध्।**

IV.

Read and give the meanings of :—

अब्द:	कल्य:	तिथि:	निशीथ:
अह:	क्षण:	दर्श:	पक्ष:
ऋतु:	ग्रीष्म:	दिवस:	पूर्णिमा
कला	घटिका	निमेष:	प्रदोष:
प्रतिपद्	युगम्	वसन्त:	हिमम्
मास:	रात्रि:	वार:	हेमन्त:
मुहूर्त:	वर्षम्	शरद्	याम:
	वर्षा:	शिशिर:	

LESSON XI.

Roots of the Seventh Conjugation.

अञ्ज् to anoint; with वि to manifest.

इन्ध् to kindle.

क्षुद् to reduce to powder or dust.

खिद् to be distressed.

छिद् to cut off, to divide.

पिष् to grind.

भञ्ज् to break, to destroy.

भिद् to split.

भुज् (A.) to dine; (P.) to enjoy.

युज् to join.

रुध् to obstruct, to prevent, to besiege.

विद् to discuss, to reason upon.

शिष् to distinguish.

हिंस् to kill, to destroy.

The sign of the 7th Conjugation is न (weak.)

This is inserted between the radical vowel and final consonant, and न् before the weak terminations: भिनत्ति, भिन्तः।

The original nasal of the root is dropped: अनज् + ति।

च् or ज् is changed to क् before a consonant (except nasal and semi-vowel): अङ्क्तः।

This change takes place also when these consonants end a word: आनक्।

त् or द् of a root becomes visarga before स् Imperat. 2nd person singular: अरुणः।

स् of हिंस् becomes त् and visarga before स् of Imperfect: अहिनत्, अहिनः।

The past passive participle is formed by adding **त्** (weak) to the root.

The past active participle is formed by adding **वत्** to the passive.

As a general rule **इ** is prefixed to this.

The feminine adjectives are formed generally by adding **आ** : **गता, दृष्टा ।**

Adjectives ending in **मत्, वत्, न्, ऋ** and **अत्** take **ई** in Feminine gender: **गच्छन्ती, धीमती, धनवती, पक्री, गुणिनी ।**

An Abstract noun is formed by adding **त्व, ता, य,** to the base of Subantha: **शुक्लत्वम्, गोता, औदार्यम् ।**

अन्, अ and **ति** also form abstract nouns from roots: **जीवनं. जयः, नीतिः ।**

तृ or **अक** form the personal nouns or adjectives denoting the 'doer' of the action expressed by the root: **नायकः, कर्ता ।**

EXERCISES.

I.

अध्ययनम्	कण्टकः	तटिनी	पक्वः
अश्मा	कषायः	तुष्टः	प्रवहन्ती

आधुनिकः	क्रुद्धः	तैलम्	बाणः
आरब्धव्यम्	गोधूमः	दग्धः	बीजम्
इन्धनम्	गोपः	दया	बुधः
उपविष्टः	घरट्टः	दुष्टः	भटः
घृतम्	द्विजः	भारतम्	भूतम्
मानः	शस्त्रम्	वाः	आशीः
रोध	शुभम्	वङ्गीयाः	सेतुः
वर्धनम्	इतरः	वासरः	पूर्वः
विधिः	सर्वः	विहीनः	अहः
धनुः	रोचिः	सजूः	उपानद्
व्रजः	आपः	शनिः	

तुष्टा द्विजा आशिषं प्रयुञ्जते ।

पूर्वे भटा धनुषा बाणेन शत्रूणां शिरोऽच्छिन्दन् ।

सर्वाः स्त्रियः शुभेऽह्नि घृतैः पक्वमन्नं सजूर्भिस्सह भुञ्जते ।

कण्टकेषूपानद्भ्यां विहीना सीता वनेषु खिन्ते ।

स्त्रिय उपविष्टा घरट्टेन गोधूमान् पिंष्युः ।

क्रुद्धा वङ्गीया भारतस्य वर्धनाय मानेन समिन्धते ।

साधवो दयया क्षमया सत्येन चेतरेभ्यो विशिंषन्ति ।

तटिन्योऽद्भिः प्रवाहन्त्यस्तिर्यग्रोधसी अभिन्दन् ।

न हिंस्यात्सर्वाणि भूतानीति विधिं केचिदेवानुसरन्ति।

आधुनिकाः कषायं पातुं कस्यचिद्वृक्षकस्य बीजानि संभृज्य क्षुणन्ति ।

शैलेष्वश्मानोऽग्ने रोचिषा दग्धा वियुञ्जते ।

अग्निरिन्धनैस्सामिन्धाम् ।

वारान्निधिं कपयस्सेतुनाऽवारुन्धन् ।

शनेर्बुधस्य च वासरे तैलेनाभ्यङ्क्ष्व ।

अध्ययनमारब्धव्यमुत शास्त्रमिति विन्दते शिष्याः ।

II.

My brother's horse is lame; so it was left out to graze.

As Rama and Hari could not say their lessons, they must repeat them to-morrow.

Govind and I are going out.

Let them kindle the fire themselves if they wish to cook.

---

(1) र् or ड् followed by र् or ढ् respectively, is dropped; and the preceding अ, इ or उ, if short, is made long.

Every heart discusses its own faults.

Govind, who was at school, broke his slate.

Protection is the principle of the good.

Gaming is beneficial, but gambling is hurtful.

The killing of creatures is bad.

Wisdom's ways are pleasant.

The sense of duty is a great gift.

Give me neither poverty nor riches.

III.

Give the Acc. pl. of धनुः, वाः, आपः and स्त्री.

Give the Abl. pl. of अहः, आपः, उपानद्.

Give the feminine gender of भिक्षुः, पक्वं, गच्छत्, रुन्धत्.

Conjugate हिंस्, रुध्, अञ्ज् and इन्ध् in Imperfect.

Form a potential participle from भुज् and रुध्.

Point out Abstract nouns in the sentences in this lesson.

IV.

Twenty golden rules (by heart).

(1) नित्यं सन्ध्यामुपासीत । (2) भजोषसि रमापतिम् ।

(3) वदेत्सत्यम् ।

(4) चरेद्धर्मम् ।

(5) नासत्यं वद कर्हिचित् ।

(6) विद्धि प्रत्यक्षदेवं त्वं मातरं पितरं गुरुम् ।

(7) नैव दुःखय भूतानि ।

(8) नैव संयुहि दुर्जनैः ।

(9) न सुरां पिब ।

(10) नाभक्ष्यं खाद ।

(11) स्वपिहि नो दिवा ।

(12) साधुर्भव त्वं शीलेन कर्मणा(1) मनसापि वा ।

(13) यथाऽन्यांस्त्वयि मन्यसे तथाऽन्येषु समाचर ।

(14) वित्तमार्जय ।

(15) मन्यस्व कृतम् ।

(16) वृद्धांश्च सम्मनु ।

(17) आयं व्ययं च सन्दृश्य व्ययं कुर्या न चान्यथा ।

(18) दयालुर्भव भूतेषु मा हिंसां कुरु कुत्रचित् ।

(19) वस्त्रेण वपुषा शुद्धो भव ।

(20) विद्यां समाश्रय ।

---

(1) न् coming after ऋ, र् and ष् in the same word is changed to ण्. This change takes place even if a vowel, a semi-vowel (ल् excepted), the aspirate ह्, or a letter of the guttural or labial class comes between ऋ, र्, ष् and न्. This change does not take place when न् ends a word : as रामान्.

॥ कथा प्रथमा । १ ॥

अजशिशोः ।

कस्य चिदाभीरस्य बह्वो मेषाश्छाग्योऽजशिशवश्च बभूवुः। स प्रत्यहं प्रातरुत्थाय तमजसमाजं श्वभिः परिरक्षितं शाद्वलेषु प्रदेशेष्वप्रमत्तश्चारयन्[1]त्सायं पुनरजगोष्ठे निरुरोध। एवं गच्छति काले कश्चनाजशावकः गोष्ठे प्रतिरोधमसह्मानः स्वेच्छया चरणे क्रीडने चानुमतिं मातरं पप्रच्छ । सा तद्वचनं श्रुत्वा मृदूक्त्या पुत्रस्य सक्तिं प्रत्याचख्यौ। अथैकदा स बस्तशिशुर्मातुर्वाक्यमु[2]ल्लङ्घ्य रात्रौ अनभिज्ञातः कथश्चिद्बहिरागत्यात्माभिलाषेण चचार। ज्योत्स्नायां

(1) If ङ् or a word ending न् be followed by स्, त् is optionally inserted between them.

(2) A dental consonant followed by ल् is changed to ल्, and न् to a nasal ल्ँ: विद्वान् + लिखति = विद्वाल्लिँखति ।

चिक्रीड । अन्ते उत्प्लुत्योत्प्लुत्य धावन् कस्यचिज्जम्बुकस्य पुरतः पपात । स क्रोष्टा तं कण्ठग्राहं गृहीत्वा कर्षन्त्स्वकुहरं प्रविवेश । तस्मात्पित्रोर्वचनं न कदाप्यतिलंघनीयम् ॥

॥ कथा द्वितीया । २ ॥

अनृतवादिन्याः ।

काञ्च्यां मित्रशर्मा नाम ब्राह्मण अवात्सीत् । स ग्रामान्तरं प्रस्थातुमनाः सपुत्रां गेहिनीमाहूय "अयि गृहरक्षणेऽवहितचित्ता भव" इति उपादिक्षत् । परेद्यवि व्युष्टे भार्या प्रातिवेशिकांश्चापृच्छ्य नगर्या योजने काञ्चन ग्रामटिकां प्रास्थित । तस्मि(1)न्नेवाहनि वामा

(1) When ङ्, ण् and न् at the end of a word or grammatical form is preceded by a short vowel and followed by any vowel, they are doubled.

गेहिनी त्रियामायाः पूर्वयाम एव ‘चोरश्चोरः’ इति मृषोच्चैराक्रुक्षत्। तस्या आर्तनिनादं श्रुत्वा ग्रामीणा मित्रशर्मणि भक्त्या तद्वेश्मनि समर्मीलिषुः। गेहं प्रविश्य यदाऽद्राक्षुस्तदा चौरा नेत्यज्ञासिषुः। ततस्ते कुटिलमतिं तां शपन्तो यथायथमगमन्। ततोऽर्धरात्रे सत्येनैव दस्यवस्तस्या वेश्म प्रविश्य किमपि बहिरलभमानास्सुप्तायाः कण्ठे माङ्गल्यं हस्तेनास्प्राक्षुः। तदा सा सरभसं प्रबुद्ध्योत्थाय ‘सत्यं चोरः, अद्धा चोरः’ इति पुनः पुनरुच्चैराह्वत्। को वा श्रद्दधाति। ग्राम्या यथापूर्वमियं मृषा क्रन्दत इति कृतनिश्चयास्तूष्णीका अभूवन्। दस्यवश्च निभृतं चोरयित्वा सर्वाणि यथेष्टन्देशमयासिषुः। तस्मादनृतवादिनञ्जना न विश्वस्युः॥

॥ कथा तृतीया । ३ ॥

अतिगृध्नोः ।

पारेसमुद्रं वीरपालितो नाम शूद्रो लङ्कामधिवसति स्म। एकदा स मृगयास्पृहया गहनवनमधिगम्य रम्यखगान् क्रीडन्मृगान् हिंस्रशार्दूलानाखेटयामास । तदैकत्र पतितश्रान्तसौवर्णं कञ्चन खञ्जखगं दृष्ट्वा कौतुकादव्यापादयन्नेव गृहमानीय समपालयत् । कृतज्ञस्स विहगो दिने दिने कनकमयकोशमेकमस्मै निसृजति स्म। एकेन केवलं कोशेनासन्तुष्टस्सः अतिगृध्नुतया तस्य पक्षिणो जठरं विदीर्य कृत्स्नान्यप्यण्डानि युगपद्गृहीतुं मतिं व्यधत्त । अथ स यावदस्योदरं छित्वा पश्यति तावदन्तः पिशितं रक्तञ्च विना नान्यदपश्यत्। मूढोऽहं धनाऽऽयस्य हेतुभूतं विहङ्गमनाशयमिति भृशं सोऽक्लिश्नात् । दिनेषु गच्छत्सु स व्ययशीलतयाऽभवदकिञ्चनः । तस्मादतिगार्ध्यम्महान्तमनर्थमापादयेत् ॥

॥ कथा चतुर्थी । ४ ॥

सिंहवृषभयोः ।

दण्डकारण्ये पिङ्गलको नाम सिंहो वनराज्येऽभिषिक्तः मृगानशिषत् । तस्य त्रयो मन्त्रिणः व्याघ्रगोमायुमृगाः । अथ सञ्जीवको नाम वृषभो मार्गभ्रष्टः पुष्टाङ्गश्चरं[1]स्तदेव वनमासदत् । स एकदा पिपासया यमुनातटमुपागतस्य पिङ्गलकस्य दृष्टिपथं गतवान् भयार्तस्तं शरणं प्रापद्यत । सोऽपि तमभयप्रदानेन मन्त्रिभिर्विशेषमपुषत् । स्वस्मिन्नेव न्येवशयच्च । ततो मत्सरग्रस्ता मन्त्रिणः 'केनाप्युपायेन [2] ऋषभो हन्तव्यः' इत्यमन्यन्त । ततः कदाचन क्षुधार्ते

(1) A final न्, when followed by च छ्, त् थ्, and ट् ठ्, is changed optionally to अनुस्वार, and to विसर्ग necessarily when they are themselves followed by a vowel and semi-vowel or a nasal; when it is not changed to Anuswara, the preceding vowel becomes अनुनासिक.

(2) Any vowel short or long except the last four followed by a short ऋ, is optionally not combined; but in that case, if long, it is made short.

मृगराजे रन्ध्रान्वेषिण एते 'मृगाधिप! न वयमन्विष्यन्तोऽपि श्रीमते लभामहि आहारलेशमपि; अतो मां जहि; मां भक्षय; मां विदारय' इति स्वामिभक्तिप्रकर्षं विनिवेदयन्त इव सिंहमवादिषुः। मायामेतामजानानस्सञ्जीवकोऽप्यात्मानं भक्षयितव्यं यदा निर्दिशति तदैव हिंस्रास्ते पिङ्गलकस्य संमतिमप्रतीक्षमाणा एवोक्षिणि निपत्य शतशस्तं विदारयामासुः। तस्माद्दुर्जनसहवासस्साधूनां प्राणहानये कल्पते ॥

॥ कथा पञ्चमी । ५ ॥

अजावञ्चकयोः ।

कश्चिज्जम्बुकः पानीयपानव्याजेन कुलीरग्रहणाय वापीङ्गतस्स्खलज्जले पपात। स यदा-

प्येकको बहिरागन्तुं बहुधाऽयतिष्ट । तथापि स मोघप्रयत्नो बभूव । अत्रान्तरे काचित् ऋजुरजा तत्रागत्य 'अपि मधुरं जलम्' इति तमन्वयुङ्क्त । शृगाल उवाच । जलस्य मधुरतां किं ब्रवीमि । केवलं पीयूषमेव । पायंपायमपि अलंबुद्धिर्न जायते, न शक्नोमि हातुमेतदिति । छागा त[1]च्छ्रुत्वा विमृश्यान्तरवाततार । तदैव तस्या दीर्घशृङ्गयोस्ततश्शिलासन्धौ च पादौ निधाय बहिरगात् । अजा बहिरागमने उपायाभावेन वाप्यन्तस्तिष्ठन्त्येव प्राणानहासीत् । तस्माद्विमृश्यकारिणां नैवंविधा अपायास्सम्भवेयुः ॥

---

(1) When a word or form ending any of the first four consonants of a class is followed by श्, the श् is optionally changed to छ् when it is itself followed by a vowel, a semi-vowel, or a nasal.

॥ कथा षष्ठी । ६ ॥

बालकानां मक्षिकाणाञ्च ।

कतिपये बाला बहिर्वितर्दिकायां क्रीडार्थं मक्षिका गृहीत्वा पाणिपादमेकशस्त्रुट्यन्तो वर्तन्ते स्म। तदा प्रतोल्या गच्छन्नेको जीनः बालकान्निशाम्य "किमर्थमेतास्तपस्विन्यो मक्षिका हन्यन्ते, हन्त! न हिंस्यात्सर्वाणि भूतानि; तस्माद्विरमत दुष्कृत्यात्" इत्युपदिदेश। तन्निशाम्य 'भो महात्मन्! बालानिमान् मक्षिकाघ्नतो मन्यते भवान्; तथा मा[1]मंस्त, न वयं मक्षिकां ह्नुमः, किंतु ताभिर्विहरामः, शपामहे भवते, इति सविनयमब्रुवन्। स वृद्धः युष्माकमयं विनोदः तासान्तु प्राणानां हानये भवतीत्युक्त्वा तान्निवारयामास। तस्माद्विनोदायापि जनो हिंसां न कुर्यात् ॥

(1) मा (ind) prohibits the augment अ or आ of the root.

॥ कथा सप्तमी । ७ ॥

कुक्कुरवृषभयोः ।

एकदा कश्चित्कुक्कुरो गोष्ठस्य द्रोण्यां पलालसंघस्योपरि शयान आसीत् । क्षुधार्तो भक्षणाय कश्चिदनड्वाँ स्तृणानां नेदीयान् त्समभवत्। तत्र स्वपन् भषकः पूर्वार्धेनो[1]त्थाय व्याघ्र इव क्रुद्धश्चळच्छळिति भषन् घोरेण घर्घररवेण तं महोक्षं दंष्टुमधावत् । दर्पणेनान्धस्येव पलालेन शुनः क उपयोगः । ततो बलीवर्दो भषकमपृच्छत् "सौम्य! भवान्न पलालान् भक्षयिष्यति। भक्षयितारमपि किमिति न सम्मन्यसे" इति । कुक्कुरः प्रत्युत्तरयितुमसमर्थस्तूष्णीमास्त। लोके केचन स्वोपयोगानर्हाणि यानि तान्यप्यन्यस्मै दातुन्नेच्छन्ति, किमुतार्हाणि। तस्मादेतादृशैरिवास्माभिः कदापि न भवितव्यम् ।

(1) The स् of स्था and स्तम्भ् is dropped after the preposition उद्.

॥ कथा अष्टमी । ८ ॥

पिपीलिकायाः ।

कस्माच्चन महानसात् नातिदूरे भ्रष्टपतितव्विँघसं काचन पिपीलिका सरन्त्यपश्यत् । पुलाकस्य महत्तया तमेकाकिनी स्वकुलायन्नेतुं बहुधा यतमाना नाशक्नोत् । किं करोमि, क्व यामि, कञ्वा सहायं प्रार्थयिष्ये, इति बहुधा चिन्ताकुलमनाः पुलाकं विसृज्य गन्तुमनिच्छन्ती प्रतीच्छन्ती सहायान्तरं तस्थौ । ततः काचिदन्या पिपीलिका आहारमन्विष्यन्ती तमेव प्रदेशमाययौ । स्वयमेवापहर्तुमनाः प्रयेते च । परन्तु विफलोद्योगा समजनि । ततः प्रथमा द्वितीयया सहैकमतिराकृष्टमुद्यमं कृतवती । विघसस्य जलार्द्रतया उच्छूनत्वात् एकमपि पदं चालयितुं प्रभुर्न बभूव । तदनन्तरमेका स्वनीडमासाद्य सर्वा अपि पिपीलिकास्साहाय्यायाऽऽनयति स्म । तास्सर्वा अप्येकमतयोऽन्नपुलाकं नीडन्नी-

त्वा सुखं भक्षयन्ति स्म तस्माद्दुस्साध्यानि कार्याणि ऐकमत्ये ईषत्कराणि भवन्ति ॥

॥ कथा नवमी । ९ ॥

राजवणिक्पुत्राणाम् ।

धारानगरे मित्रपालितो नाम कश्चिद्वैश्य उवास । तस्य द्वौ कुमारावास्ताम् । तयोरेकतरो नाम्ना कृष्णः । अन्यतरो रामः । उभावेतौ सायं सञ्चारेच्छया बहिर्निर्गतौ राजोद्यानं प्राविक्षताम् । तत्र विविधाः पुष्पिता लताः पल्लवितान् द्रुमान् द्विपत्रितान् क्षुपान् अन्यानि च निरीक्ष्य कालमतिवाहयन्तौ अस्तमयसमये हस्तेनापि प्रचेयफलं निघमाम्रमाजग्मतुः । तयोः प्रथमः—‘कनीयन् ! फलानि कथं रम्याणि वर्तन्ते । मन्येऽतीव मधुराणि स्युः’ इति ।

द्वितीयः—'ज्यायन्! आम्र्, सहकाराणां फलान्येवमेव विद्येरन्'

प्रथमः—'तर्हि आवयोः फलद्वयं प्रचिनुयाव।

द्वितीयः—'फलस्वामिन्यसति अनस्मदीयं वस्तु न कदापि गृह्णीयात्; गृहीतं चेच्चौर्यमेव भवेत्'

प्रथमः—'किं चौर्येण फलानि गृहं नेष्यावः? न, किन्तु भक्षितुं फलद्वयम् अपचेष्यावः, नातोऽधिकं प्रचेष्यते, को दोषः?' इति वृक्षात् फलप्रचायमकरोत्

सर्वमेतं वृत्तान्तं प्र[1]च्छन्नो निरीक्षमाणो राजा हस्तग्राहमेतै गृहीत्वा 'चोरौ' 'कतरो युवयोः फलमचूचुरत्?' इति भर्त्सयन् पप्रच्छ। तौ बालौ सधैर्यं सत्यं चरितमबादिष्टाम्। तयोस्सत्यवचनेन धैर्येण च विस्मितमनास्सन्तुष्टः तौ राजकीयपाठशालायामध्याप्य कालक्रमेण

(1) छ् following a short vowel is changed to च्छ्.

स्वमन्त्रिणौ च चकार । तस्मात्सत्यं वदन्ति ये ते सर्वत्र जयं लभन्ते ॥

॥ कथा दशमी । १० ॥

वणिक्सर्पयोः ।

कश्चिद्वणिक्मधुनद्याः पण्यसङ्घाद्दृढाङ्गौ गवाजौ क्रीणन् विपिनमार्गेण स्वपल्लीं व्रजन्नास्त । मध्येमार्गं दवेन परीतस्य गुल्मस्य अन्तःप्लोषेण मुमूर्षुं सर्पमदर्शत् । स भुजगस्तं वीक्ष्य 'अहो पान्थ ! मामनला[1]दुद्धर, मन्मूर्धनि स्थितम्मणिं पारितोषिकं ददामि' इति सकरुणमयाचत् । पथिको दयापन्नः स्वस्य ताम्बूलभस्त्रिकां कस्यचन वंशदण्डस्याग्रे बध्वा तस्मिन् प्रवेश्य पन्नगं पावकाद्व्यमोचयत् । फणी

(1) ह् preceded by any of the first letters of a class is changed to the fourth letter of that class optionally.

न केवलं पारितोषिकस्य अदानमैच्छत् । परन्तु नरोऽयं कदाचिन्मां हनिष्यतीति मत्वा तं दंष्टुं व्यवसिद्ध्रुवत् । पथिकः पुनरहननविषये गामजञ्च स्वकीयौ प्रतिभुवौ वरयामास 'नरोऽसौ मम वत्सायापि दुग्धमशेषयन् दोग्धि' इति कोपेन गौस्सम्मतिन्नददौ । 'अकारणमयम् अजान् हन्ति' इति अजोऽपि लग्नकतां निराख्यत् । ततः पान्थे चिन्ताकुले सति जम्बुको यदृच्छया तं प्रदेशमागम्य समुदितानेतांश्चिन्तापरान् दृष्ट्वा 'किमिदं विचार्यत' इति अनुयुयोज । स पथिकश्चरितमुदन्तं यथावन्निवेदयामास । स फेरुः पथिकविमोचने कंचनोपायं मनसा विचिन्त्य नागं वीक्ष्य 'भो नाग! कथं त्वामयं दह्यमानात् गुल्मात् बहिरानयत्? पश्यानि' इति व्याजहार । यावत्सर्पो व्याजमजानानः मञ्जिकायाः अन्तः पुनरपि प्रविवेश, तावत्सञ्जिकामुखं बद्धुं पथिकस्य संज्ञां चकार । पथिकस्तथा कृत्वा

सुखं स्वगृहं ययौ । तस्माद्ये कृतमुपकारं विस्मरन्ति ते श्रेयो न प्राप्नुयुः, ये स्मरन्ति ते श्रेयः प्राप्नुवन्ति ॥

इति ।

सन्धिविशेषाः ।

1. If a Preposition ending in अ is followed by a root beginning with short ऋ, the वृद्धि instead of गुण of ऋ is substituted for both vowels : उप + ऋच्छति = उपार्च्छति.

2. If a Preposition ending in अ is followed by a root beginning with ए or ओ, the अ is dropped : प्र + एजते = प्रेजते ; उप + ओषति = उपोषति.

3. But if a form of the root 'इ to go' or एध् beginning with ए, comes after अ, the अ is not dropped : उप + एति = उपैति ; उप + एधते = उपैधते.

4. अ followed by एव used in an Indefinite sense is dropped : क्वेव भोक्ष्यसे.

5. अ followed by ओं or आ (Preposition) is dropped : शिवायोन्नमः ; शिव + आ + इहि = शिवेहि.

6. At the end of a word इ, उ, ऋ, or ऌ short or long, followed by a dissimilar vowel of a word,

are optionally not combined; but in that case, if long; they are made short : **गुणी + आगच्छति गुणि आगच्छति** or **गुण्यागच्छति.** This rule has no effect in a compound : **वाप्यश्वः.**

---

7. Dentals coming after **श्** do not substitute the corresponding palatals : **प्रश् + नः = प्रश्नः.**

8. In the body of a word or grammatical form, **म्** and **न्** are changed to an **अनुस्वार** when followed by **श्, ष्, स्** or **ह्**; **यशांसि ; आक्रंस्यते.**

9. To the ending **न्** of a word followed by **श्**, **त्** is optionally suffixed; which with the following **श्** is changed to **च्**. See rule : **सन्+शंभुः = सञ्च् शंभुः** etc.

---

10. Visarga remains unchanged if a sibilant follows **त्, क्. प्** : **समुद्रः क्षुभ्यति ; अद्भिः प्साति.**

11. Visarga preceded by **अ** or **आ** and followed by a vowel (except in the case of **अ**), is optionally changed to **य्** : **कः + इच्छति=कयिच्छति ; देवाः + अवन्तु = देवायवन्तु.**

12. स् or विसर्ग followed by क्, ख्, and प्, फ् is optionally changed to जिह्वामूलीय and उपध्मानीय respectively : रामᳵकरोति, नृपᳶपालयति.

---

13. Consonants, ह् and र् excepted, preceded by a vowel are optionally doubled, if no vowel follows : मद्ध्वरिः.

14. छ् following a long vowel and at the end of a word or grammatical form, is optionally changed to च्छ्; but after मा (negative particle) and आ (prep.), it is necessary: चेच्छिद्यते, छुरिकया च्छिनत्ति.

15. The final vowel or the final consonant with the preceding vowel of a sentence, addressed to a person who is at a distance from the speaker, or meant as a return of salute, becomes प्लुत.

प्लुत vowels never combine with the following vowels.

प्लुत vowels measure 3 Mathras as ह्रस्व and दीर्घ measure one and two respectively : आगच्छ कृष्णा ३ अत्र गौश्चरति, आयुष्मानेधि देवदत्ता ३ ।

स्व + ईरः = स्वैरः ।

प्र + ऊढः = प्रौढः ।

सुखेन + ऋतः = सुखार्तः ।

प्र + ऋणं = प्रार्णम्, etc.

स्थूल + ओतुः = स्थूलोतुः, स्थूलौतुः ।

बिम्ब + ओष्ठः = बिम्बोष्ठः, बिम्बौष्ठः ।

गो + अग्रम् = गोऽग्रं, गो अग्रम्, गवाग्रम् ।

गो + अक्षः = गवाक्षः ।

अमी + ईशाः = अमी ईशाः ।

विष्णो + इति = विष्ण इति, विष्णविति, विष्णो इति ।

नमः + करोति = नमस्करोति ।

पुरः + पश्यति = पुरस्पश्यति ।

पुम् + पुत्रः = पुँस्पुत्रः, पुंस्पुत्रः ।

तिरः + करोति = तिरस्करोति, तिर‍ᳶकरोति ।

द्विः + करोति = द्विष्करोति, etc.

त्रिः + करोति = त्रिष्करोति, etc.

चतुः + करोति – चतुष्करोति, etc.

चतुः + कपालः = चतुष्कपालः ।

सर्पिः + करोति = सर्पिष्करोति, etc.

14

धनुः + करोति = धनुष्करोति, etc.

अयः + कंसः = अयस्कंसः ।

अयः + कुम्भः = अयस्कुम्भः ।

सम् + राट् = सम्राट् ।

किं + ह्लादयति = किल् ह्लादयति, किं ह्लादयति ।

किं + ह्नुते = किन्ह्नुते, किं ह्नुते ।

प्राङ् + षष्ठः = प्राङ्ख् षष्ठः, प्राङ्क्षष्ठः, प्राङ्षष्ठः ।

सुगण् + षष्ठः = सुगण्ठ्षष्ठः, सुगण्ट्षष्ठः, सुगण्षष्ठः ।

सं + कर्ता = संस्कर्ता, सँस्कर्ता ।

पुं + कोकिलः = पुंस्कोकिलः, पुँस्कोकिलः ।

नॄन् + पाहि = नॄँ ⤙पाहि, etc.

कान् + कान् = काँस्कान्, कांस्कान् ।

अयः + कारः = अयस्कारः ।

अयः + कामः = अयस्कामः ।

अयः + पात्रम् = अयस्पात्रम् ।

अयः + कुशा = अयस्कुशा ।

अयः + कर्णी = अयस्कर्णी ।

अधः + पदम् = अधस्पदम्, अध⤙पदम् ।

शिरः + पदम् = शिरस्पदम्, शिर⤙पदम् ।

कः + कः = कस्कः ।

भाः + करः = भास्करः ।

अहः + अहः = अहरहः ।

स + एषः = सैषः ।

सीमन् + अन्तः = सीमन्तः ।

मार्त + अण्डः + मार्तण्डः ।

पटत् + इति = पटिति ।

Verbal

धातवः	क्त	क्तवत्	शतृ	शानच्
अञ्ज्	अक्त	अक्तवत्	अञ्जत्	अञ्जान
अट्	अटित	अटितवत्	अटत्	...
अत्	अतित	अतितवत्	अतत्	...
अद्	जग्ध, अन्न	जग्धवत्	अदत्	...
अव्	अवित	अवितवत्	अवत्	...
अश् ५	अष्ट	अष्टवत्	...	अश्नुवान
अश्	अशित	अशितवत्	अश्नत्	...
अस् ४	अस्त	अस्तवत्	अस्यत्	...
अस्	भूत	भूतवत्	सत्	...
आप्	आप्त	आप्तवत्	आप्नुवत्	...
आस्	आसित	आसितवत्	...	आसीन
इ	इत	इतवत्	यत्	...
अधि इ	अधीत	अधीतवत्	...	अधीयान
इन्ध्	इद्ध	इद्धवत्	...	इन्धान
इष्	इष्ट	इष्टवत्	इच्छत्	...

Derivations.

क्त्वा	ल्यप्	तुम्	णिच्
अञ्जित्वा, अक्त्वा, अङ्क्त्वा	समज्य	अङ्क्तुम्, अञ्जितुम्	अञ्जयति
अटित्वा	पर्यट्य	अटितुम्	आटयति
अतित्वा	प्रात्य	अतितुम्	आतयति
जग्ध्वा	प्रजग्ध्य	अत्तुम्	आदयति
अवित्वा	समव्य	अवितुम्	आवयति
अशित्वा, अष्ट्वा	समश्य	अशितुं, अष्टुं	आशयति
अशित्वा	प्राश्य	अशितुम्	आशयति
असित्वा, अस्त्वा	निरस्य	असितुम्	आसयति
भूत्वा	प्रभूय	भवितुम्	आसयति
आप्त्वा	प्राप्य	आप्तुम्	आपयति
आसित्वा	आस्य	आसितुम्	भावयति
इत्वा	उपेत्य	एतुम्	आययति
...	अधीत्य	अध्येतुम्	अध्यापयति
इन्धित्वा	समिध्य	इन्धितुम्	इन्धयति
एषित्वा, इष्ट्वा	प्रेष्य	एषितुं, एष्टुम्	एषयति

Verbal

धातवः	क्त	क्तवत्	शतृ	शानच्
ईर्	ईरित	ईरितवत्	ईरयत्	ईरयमाण
उञ्छ्	उञ्छित	उञ्छितवत्	उञ्छत्	...
उभ्	उभित	उभितवत्	उभत्	...
उष्	उषित	उषितवत्	ओषत्	...
ऊह्	ऊहित	ऊहितवत्	ऊहत्	...
ऋच्	ऋचित	ऋचितवत्	ऋचत्	...
ओख	ओखित	ओखितवत्	ओखत्	...
ओण्	ओणित	ओणितवत्	ओणत्	...
कथ्	कथित	कथितवत्	कथयत्	कथयमान
कम्प्	कम्पित	कम्पितवत्	कम्पयत्	...
कृ	कृत	कृतवत्	कुर्वत्	कुर्वाण
कॄ ६	कीर्ण	कीर्णवत्	किरत्	...
कॄ	कीर्ण	कीर्णवत्	कृणत्	...
क्रीत	क्रीत	क्रीतवत्	क्रीणत्	क्रीणान
क्रीड्	क्रीडित	क्रीडितवत्	क्रीडत्	...

Derivations.

क्त्वा	ल्यप्	तुम्	णिच्
ईरयित्वा	प्रेर्य	ईरयितुम्	ईरयति
उञ्छित्वा	प्रोञ्छ्य	उञ्छितुम्	उञ्छयति
ओभित्वा	समुभ्य	ओभितुम्	ओभयति
ओषित्वा	प्रोष्य	ओषितुम्	ओषयति
ऊहित्वा	समुह्य	ऊहितुम्	ऊहयति
अर्चित्वा	समृच्च्य	अर्चितुम्	अर्चयति
ओखित्वा	प्रोख्य	ओखितुम्	ओखयति
ओणित्वा	समोण्य	ओणितुम्	ओणयति
कथयित्वा	सङ्कथय्य	कथयितुम्	कथयति
कम्पयित्वा	प्रकम्प्य	कम्पयितुम्	कम्पयति
कृत्वा	संस्कृत्य	कर्तुम्	कारयति
कीर्त्वा	विकीर्य	करितुं, करीतुम्	कारयति
कीर्त्वा	विकीर्य	...	...
क्रीत्वा	विक्रीय	विक्रेतुम्	क्रापयति
क्रीडित्वा	संक्रीड्य	क्रीडितुम्	क्रीडयति

Verbal

धातवः	क्त	क्तवत्	शतृ	शानच्
क्षल्	क्षालित	क्षालितवत्	क्षालयत्	क्षालयमान
क्षिप्	क्षिप्त	क्षिप्तवत्	क्षिपत्	...
क्षुद्	क्षुण्ण	क्षुण्णवत्	क्षुन्दत्	क्षुन्दान
क्षुभ्	क्षुभित	क्षुभितवत्	क्षुभ्नत्	...
खन्	खात	खातवत्	खनत्	...
खिद्	खिन्न	खिन्नवत्	...	खिन्दान
गज्	गजित	गजितवत्	गजत्	...
गण्	गणित	गणितवत्	गणयत्	गणयमान
गद्	गदित	गदितवत्	गदत्	...
गम्	गत	गतवत्	गच्छत्	...
गल्	गलित	गलितवत्	गलत्	...
गल्भ्	गल्भित	गल्भितवत्	...	गल्भमान
गॄ	गीर्ण	गीर्णवत्	गिरत्	...
ग्रन्थ्	ग्रथित	ग्रथितवत्	ग्रथ्नत्	...

Derivations.

क्त्वा	ल्यप्	तुम्	णिच्
क्षालयित्वा	प्रक्षाल्य	क्षालयितुम्	क्षालयति
क्षिप्त्वा	प्राक्षिप्य	क्षेप्तुम्	क्षेपयति
क्षुत्वा	संक्षुद्य	क्षोत्तुम्	क्षोदयति
क्षुभित्वा, क्षोभित्वा	प्रक्षुभ्य	क्षोभितुम्	क्षोभयति
खात्वा, खनित्वा	प्रखन्य	खनितुम्	खानयति
खित्वा	संखिद्य	खेत्तु{	खेदयति
गाजित्वा	प्रगज्य	गजितुम्	गाजयति
गणयित्वा	विगणय्य	गणयितुम्	गणयति
गदित्वा	अनुगद्य	गदितुम्	गादयति
गत्वा	आगम्य, आगत्य	आगन्तुम्	गमयति
गलित्वा	निगल्य	गलितुम्	गालयति
गल्भित्वा	प्रगल्भ्य	गल्भितुम्	गल्भयति
गीर्त्वा	निगीर्य	गरितुं, गरीतुम्	गारयति
ग्रथित्वा, ग्रन्थित्वा	सङ्ग्रथ्य	ग्रन्थितुम्	ग्रन्थयति

Verbal

धातवः	क्त	क्तवत्	शतृ	शानच्
ग्रह्	गृहीत	गृहीतवत्	गृह्णत्	गृह्णान
घघ्	घघित	घघितवत्	घघत्	...
घ्रा	घ्रात, घ्राण	घ्रातवत्, घ्राणवत्	जिघ्रत्	...
चर्	चरित	चरितवत्	चरत्	...
चल्	चलित	चलितवत्	चलत्	...
चि	चित	चितवत्	चिन्वत्	चिन्वान
चिन्त्	चिन्तित	चिन्तितवत्	चिन्तयत्	चिन्तयमान
चुद्	चोदित	चोदितवत्	चोदयत्	चोदयमान
चुर्	चोरित	चोरितवत्	चोरयत्	चोरयमाण
छम्	छान्त	छान्तवत्	छमत्	...
छिद्	छिन्न	छिन्नवत्	छिन्दन्	छिन्दान
जन्	जात	जातवत्	...	जायमान
जप्	जपित	जपितवत्	जपत्	...
जल्प्	जल्पित	जल्पितवत्	जल्पत्	...
जागृ	जागरित	जागरितवत्	जाग्रत्	...

Derivations.

क्त्वा	ल्यप्	तुम्	णिच्
गृहीत्वा	निगृह्य	ग्रहीतुम्	ग्राहयति
घघित्वा	प्रघघ्य	घघितुम्	घाघयति
घ्रात्वा	आघ्राय	घ्रातुम्	घ्रापयति
चरित्वा	आचर्य	चरितुम्	चारयति
चलित्वा	सञ्चल्य	चलितुम्	चलयति चालयति
चित्वा	प्रचित्य	चेतुम्	चापयति चाययति
चिन्तयित्वा	संचिन्त्य	चिन्तयितुम्	चिन्तयति
चोदयित्वा	संचोद्य	चोदयितुम्	चोदयति
चोरयित्वा	संचोर्य	चोरयितुम्	चोरयति
छमित्वा, छान्त्वा	आछम्य	छमितुम्	छमयति
छित्वा	प्रच्छिद्य	छेत्तुम्	छेदयति
जनित्वा	संजन्य	जनितुम्	जनयति
जपित्वा	प्रजप्य	जपितुम्	जापयति
जल्पित्वा	प्रजल्प्य	जल्पितुम्	जल्पयति
जागरित्वा	प्रजागर्य	जागरितुम्	जागरयति

Verbal

धातवः	क्त	क्तवत्	शतृ	शानच्
जि	जित	जितवत्	जयत्	जयमान
जीव्	जीवित	जीवितवत्	जीवत्	...
ज्ञा	ज्ञात	ज्ञातवत्	जानत्	जानान
झट्	झटित	झटितवत्	झटत्	...
डप्	डपित	डपितवत्	डपत्	...
तड्	ताडित	ताडितवत्	ताडयत्	ताडयमान
तन्	तत	ततवत्	तन्वत्	तन्वान
तप्	तप्त	तप्तवत्	तपत्	तपमान
तुल्	तोलित	तोलितवत्	तोलयत्	तोलयमान
तुष्	तुष्ट	तुष्टवत्	तुष्यत्	...
तृण्	तृत	तृतवत्	तृण्वत्-तर्ण्वत्	...
तॄ	तीर्ण	तीर्णवत्	तरत्	...
दण्ड्	दण्डित	दण्डितवत्	दण्डयत्	दण्डयमान
दल्	दलित	दलितवत्	दलत्	...
दह्	दग्ध	दग्धवत्	दहत्	...

Derivations.

क्त्वा	ल्यप्	तुम्	णिच्
जित्वा	विजित्य	जेतुम्	जापयति
जीवित्वा	संजीव्य	जीवितुम्	जीवयति
ज्ञात्वा	विज्ञाय	ज्ञातुम्	ज्ञापयति–ज्ञपयति
झटित्वा	प्रझट्य	झटितुम्	झाटयति
डपित्वा	प्रडप्य	डपितुम्	डापयति
ताडयित्वा	संताड्य	ताडयितुम्	ताडयति
तनित्वा, तत्वा	वितत्य	तनितुम्	तानयति
तप्त्वा	संतप्य	तप्तुम्	तापयति
तोलयित्वा	प्रतोल्य	तोलयितुम्	तोलयति
तुष्ट्वा	संतुष्य	तोष्टुम्	तोषयति
तर्णित्वा-तृत्वा	संतृण्य	तर्णितुम्	तर्णयति
तीर्त्वा	वितीर्य	तरितुम्-तरीतुम्	तारयति
दण्डयित्वा	सन्दण्ड्य	दण्डयितुम्	दण्डयति
दलित्वा	प्रदल्य	दलितुम्	दलयति
दग्ध्वा	सन्दह्य	दग्धुम्	दाहयति

Verba

धातवः	क्त	क्तवत्	शतृ	शानच्
दा	दत्त	दत्तवत्	ददत्	ददान
दिश्	दिष्ट	दिष्टवत्	दिशत्	...
दिह	दिग्ध	दिग्धवत्	दिहत्	दिहान
दुह्	दुग्ध	दुग्धवत्	दुहत्	दुहान
दृश्	दृष्ट	दृष्टवत्	पश्यत्	...
दॄ ९–१०	दीर्ण–दारित	दीर्णवत्, दारितवत्	दृणत्, दारयत्	दारयमाण
दो	दित	दितवत्	द्यत्	...
द्युत्	द्युतित	द्युतितवत्		द्योतमान
द्रा	द्राणः	द्राणवत्	द्रात्	...
द्विष्	द्विष्ट	द्विष्टवत्	द्विषत्	द्विषाण
धा	हित	हितवत्	दधत्	दधान
धाव्	धावित	धावितवत्	धावत्	धावमान
धृ	धृत	धृतवत्	धरत्	धरमाण
ध्मा	ध्मात	ध्मातवत्	धमत्	...
नद्	नदित	नदितवत्	नदत्	...

Derivations.

क्त्वा	ल्यप्	तुम्	णिच्
दत्वा	व्यादाय	दातुम्	दापयति
दिष्ट्वा	उपदिश्य	देष्टुम्	देशयति
दिग्ध्वा	सन्दिह्य	देग्धुम्	देहयति
दुग्ध्वा	प्रदुह्य	दोग्धुम्	दोहयति
दृष्ट्वा	सन्दृश्य	द्रष्टुम्	दर्शयति
दीर्त्वा, दारयित्वा	विदीर्य, विदार्य	दरितुम्, दरीतुम्, दारयितुम्	दारयति
दित्वा	प्रदाय	दातुम्	दापयति
द्युतित्वा, द्योतित्वा	प्रद्युत्य	द्योतितुम्	द्योतयति
द्रात्वा	निद्राय	द्रातुम्	द्रापयति
द्विष्ट्वा	विद्विष्य	द्वेष्टुम्	द्वेषयति
हित्वा	निधाय	धातुम्	धापयति
धावित्वा, धौत्वा	प्रधाव्य	धावितुम्	धावयति
धृत्वा	उद्धृत्य	धर्तुम्	धारयति
ध्मात्वा	आध्माय	ध्मातुम्	ध्मापयति
नदित्वा	प्रणद्य	नादितुम्	नादयति

Verbal

धातवः	क्त	क्तवत्	शतृ	शानच्
नम्	नत	नतवत्	नमत्	...
नश्	नष्ट	नष्टवत्	नश्यत्	...
नह्	नद्ध	नद्धवत्	नह्यत्	नह्यमान
निज्	निक्त	निक्तवत्	नेनिजत्	नेनिजान
नी	नीत	नीतवत्	नयत्	नयमान
नु	नुत	नुतवत्	नुवत्	...
नृत्	नृत्त	नृत्तवत्	नृत्यत्	...
पच्	पक्व	पक्ववत्	पचत्	पचमान
पठ्	पठित	पठितवत्	पठत्	...
पत्	पतित	पतितवत्	पतत्	...
पा	पीत	पीतवत्	पिबत्	...
पा	पात	पातवत	पात्	...
पिष्	पिष्ट	पिष्टवत्	पिंषत्	...
पुष्	पुष्ट	पुष्टवत्	पुष्यत्	...
पू	पूत	पूतवत्	पुनत्	पुनान

Derivations.

क्त्वा	ल्यप्	तुम्	णिच्
नत्वा	प्रणम्य	नन्तुम्	नमयति
नशित्वा, नंष्ट्वा	प्रणश्य	प्रनंष्टुम्	नाशयति
नद्ध्वा	अपिनह्य	नद्धुम्	नाहयति
निक्त्वा	अवनिज्य	नेक्तुम्	नेजयति
नीत्वा	आनीय	नेतुम्	नाययति
नुत्वा	प्रणुत्य	नोतुम्	नावयति
नर्तित्वा	प्रनृत्य	नर्तितुम्	नर्तयति
पक्त्वा	सम्पच्य	पक्तुम्	पाचयति
पठित्वा	प्रपठ्य	पठितुम्	पाठयति
पतित्वा	प्रपत्य	पतितुम्	पातयति
पीत्वा	प्रपाय	पातुम्	पाययति
पात्वा	प्रपाय	पातुम्	पालयति
पिष्ट्वा	सम्पिष्य	पेष्टुम्	पेषयति
पुष्ट्वा	सम्पुष्य	पे.ष्टुम्	पोषयति
पूत्वा	उत्पूय	पवितुम्	पावयति

Verbal

धातवः	क्त	क्तवत्	शतृ	शानच्
पूज्	पूजित	पूजितवत्	पूजयत्	पूजयमान
पृ	व्यापृत	व्यापृतवत्	...	प्रियमाण
प्रच्छ्	पृष्ट	पृष्टवत्	पृच्छत्	पृच्छमान
प्रथ्	प्रथित	प्रथितवत्	प्रथयत्	...
प्री	प्रीत	प्रीतवत्	प्रीणत्	...
फण्	फणित	फणितवत्	फणत्	...
फल्	फलित	फलितवत्	फलत्	...
बन्ध्	बद्ध	बद्धवत्	बध्नत्	...
भज्	भक्त	भक्तवत्	भजत्	भजमान
भञ्ज्	भग्न	भग्नवत्	भञ्जत्	...
भष्	भषित	भषितवत्	भषत्	...
भा	भात	भातवत्	भात्	...
भिद्	भिन्न	भिन्नवत्	भिन्दत्	भिन्दान
भी	भीत	भीतवत्	बिभ्यत्	...
भुज्	भुक्त	भुक्तवत्	भुञ्जत्	भुञ्जान

Derivations.

क्त्वा	ल्यप्	तुम्	णिच्
पूजयित्वा	सम्पूज्य	पूजयितुम्	पूजयति
पृत्वा	व्यापृत्य	व्यापर्तुम्	व्यापारयति
पृष्ट्वा	परिपृच्छ्य	प्रष्टुम्	प्रच्छयति
प्रथयित्वा	परिप्रथय्य	प्रथयितुम्	प्रथयति
प्रीत्वा	सम्प्रीय	प्रेतुम्	प्रीणयति
फणित्वा	सम्फण्य	फणितुम्	फणयति
फलित्वा	सम्फल्य	फलितुम्	फालयति
बध्वा	आबध्य	बन्धुम्	बन्धयति
भक्त्वा	विभज्य	भक्तुम्	भाजयति
भक्त्वा, भङ्क्त्वा	सम्भज्य	भङ्क्तुम्	भञ्जयति
भषित्वा	सम्भष्य	भषितुम्	भाषयति
भात्वा	विभाय	भातुम्	भापयति
भित्त्वा	विभिद्य	भेत्तुम्	भेदयति
भीत्वा	सम्भीय	भेतुम्	भीषयते, भापयते भाययति
भुक्त्वा	उपभुज्य	भोक्तुम्	भोजयति

Verbal

धातवः	क्त	क्तवत्	शतृ	शानच्
भू	भूत	भूतवत्	भवत्	...
भूष्	भूषित	भूषितवत्	भूषयत्	भूषयमाण
भृ	भृत	भृतवत्	बिभ्रत्	बिभ्राण
मथ्	मथितं	मथितवत्	मथत्	...
मद्	मत्त	मत्तवत्	माद्यत्	...
मन्	मत	मतवत्	...	मन्यमान
मन्	मत	मतवत्	...	मन्वान
मन्त्र्	मन्त्रित	मन्त्रितवत्	...	मन्त्रयमाण
मन्थ्	मथित	मथितवत्	मथ्नत्	...
मा	मित	मितवत्	...	मिमान
मुच्	मुक्त	मुक्तवत्	मुञ्चत्	मुञ्चमान
मुष्	मुषित	मुषितवत्	मुष्णत्	...
यज्	इष्ट	इष्टवत्	यजत्	यजमान
यस्	यस्त	यस्तवत्	यस्यत्, यसत्	...
या	यात	यातवत्	यात्	...

Derivations.

क्त्वा	ल्यप्	तुम्	णिच्
भूत्वा	सम्भूय	भवितुम्	भावयति
भूषयित्वा	सम्भूष्य	भूषयितुम्	भूषयति
भृत्वा	सम्भृत्य	भर्तुम्	भारयति
मथित्वा	प्रमथ्य	मथितुम्	माथयति
मदित्वा	सम्मद्य	मदितुम्	मादयति
मत्वा	सम्मत्य	मन्तुम्	मानयति
मनित्वा, मत्वा	सम्मत्य	मनितुम्	मानयति
मन्त्रयित्वा	सम्मन्त्रय	मन्त्रयितुम्	मन्त्रयति
मथित्वा, मन्थित्वा	प्रमथ्य	मन्थितुम्	मन्थयति
मित्वा	प्रमाय	मातुम्	मापयति
मुक्त्वा	विमुच्य	मोक्तुम्	मोचयति
मुषित्वा	परिमुष्य	मोषितुम्	मोषयति
इष्ट्वा	प्रेज्य	यष्टुम्	याजयति
यसित्वा	प्रयस्य	प्रयसितुम्	यासयति
यात्वा	प्रयाय	यातुम्	यापयति

Verbal

धातवः	क्त	क्तवत्	शतृ	शानच्
युज्	युक्त	युक्तवत्	युञ्जत्	युञ्जान
युध्	युद्ध	युद्धवत्	युध्यत्	युध्यमान
रक्ष्	रक्षित	रक्षितवत्	रक्षत्	...
रच्	रचित	रचितवत्	रचयत्	रचयमान
रट्	रटित	रटितवत्	रटत्	...
रम्	रत	रतवत्	...	रममाण
रु	रुत	रुतवत्	रुवत्	...
रुध्	रुद्ध	रुद्धवत्	रुन्धत्	रुन्धान
लज्ज्	लज्जित	लज्जितवत्	...	लज्जमान
लप्	लपित	लपितवत्	लपत्	...
लभ्	लब्ध	लब्धवत्	...	लभमान
लष्	लषित	लषितवत्	लष्यत्, लषत्	...
लिख्	लिखित	लिखितवत्	लिखत्	...
लिप्	लिप्त	लिप्तवत्	लिम्पत्	लिम्पमान
ली	लीन	लीनवत्	लिनत्	...

Derivations.

क्त्वा	ल्यप्	तुम्	णिच्
युक्त्वा	प्रयुज्य	योक्तुम्	योजयति
युध्वा	संयुध्य	योद्धुम्	योधयति
रक्षित्वा	संरक्ष्य	रक्षितुम्	रक्षयति
रचयित्वा	विरचय्य	रचयितुम्	रचयति
रटित्वा	संरट्य	रटितुम्	राटयति
रमित्वा, रत्वा	विरम्य	रन्तुम्	रमयति
रुत्वा	विरुत्य	रवितुम्	रावयति
रुध्वा	संरुध्य	रोद्धुम्	रोधयति
लज्जित्वा	प्रलज्ज्य	लज्जितुम्	लज्जयति
लपित्वा	प्रलप्य	लपितुम्	लापयति
लब्ध्वा	उपलभ्य	लब्धुम्	लम्भयति
लषित्वा	अभिलष्य	लषितुम्	लाषयति
लिखित्वा, लेखित्वा	विलिख्य	लेखितुम्	लेखयति
लिप्त्वा	विलिप्य	लेप्तुम्	लेपयति
लीत्वा	विलीय	लेतुम्, लातुम्	लीनयति, लालयति लाययति, लापयति

Verbal

धातवः	क्त	क्तवत्	शतृ	शानच्
लू	लून	लूनवत्	लुनत्	लुनान
वद्	उदित	उदितवत्	वदत्	...
वाद्	वादित	वादितवत्	...	वादयमान
वन्	वत	वतवत्	...	वन्वान
वप्	उप्त	उप्तवत्	वपत्	...
वस्	उषित	उषितवत्	वसत्	...
वस्	वसित	वसितवत्	...	वसान
वर्ण्	वर्णित	वर्णितवत्	वर्णयत्	वर्णयमान
वर्ष्	वर्षित	वर्षितवत्	वर्षत्	...
वह्	ऊढ	ऊढवत्	वहत्	वहमान
विद् ४	विन्न	विन्नवत्	...	विद्यमान
विद् ६	विन्न, वित्त	do वित्तवत्	विन्दत्	विन्दमान
विद्	विदित	विदितवत्	विदत्	...
विश्	विष्ट	विष्टवत्	विशत्	...
विष्	विष्ट	विष्टवत्	वेविषत्	वेविषाण

Derivations.

क्त्वा	ल्यप्	तुम्	णिच्
लूत्वा	प्रलूय	लवितुम्	लावयति
उदित्वा	प्रोद्य	वदितुम्	वादयति
वादयित्वा	अभिवाद्य	वादयितुम्	वादयते
वनित्वा, वत्वा	संवन्य	वनितुम्	वनयति, वानयति
उप्त्वा	निरुप्य	वप्तुम्	वापयति
उषित्वा	प्रोष्य	वस्तुम्	वासयति
वसित्वा	संवस्य	वसितुम्	वासयति
वर्णयित्वा	संवर्ण्य	वर्णयितुम्	वर्णयति
वर्षित्वा	संवर्ष्य	वर्षितुम्	वर्षयति
ऊढ्वा	व्युह्य	वोढुम्	वाहयति
वित्वा	संविद्य	वेत्तुम्	वेदयति
वित्वा	परिविद्य	वेत्तुम्	वेदयति
विदित्वा	संविद्य	वेदितुम्	वेदयति
विष्ट्वा	निविश्य	वेष्टुम्	वेशयति
विष्ट्वा	परिविष्य	वेष्टुम्	वेषयति

Verbal

धातवः	क्त	क्तवत्	शतृ	शानच्
वृ	वृत	वृतवत्	वृण्वत्	वृण्वान
वृत्	वृत्त	वृत्तवत्	...	वर्तमान
वृष्	वृष्ट	वृष्टवत्	वर्षत्	...
वॄ	वूर्ण	वूर्णवत्	वृणत्	...
वे	उत	उतवत्	वयत्	वयमान
शंस्	शस्त	शस्तवत्	शंसत्	...
शक्	शक्त	शक्तवत्	शक्नुवत्	...
शप्	शप्त	शप्तवत्	शपत्	शपमान
शम्	शान्त	शान्तवत्	शाम्यत्	...
शश्	शशित	शशितवत्	शशत्	...
शिष्	शिष्ट	शिष्टवत्	शिंषत्	...
शी	शयित	शयितवत्	...	शयान
श्रु	श्रुत	श्रुतवत्	शृण्वत्	...
श्लिष्	श्लिष्ट	श्लिष्टवत्	श्लिष्यत्	...
श्वस्	श्वसित	श्वसितवत्	श्वसत्	...

Derivations.

क्त्वा	ल्यप्	तुम्	णिच्
वृत्वा	परिवृत्य	वरितुं, वरीतुम्	वारयति
वर्तित्वा, वृत्त्वा	निवृत्य	वर्तितुम्	वर्तयति
वर्षित्वा, वृष्ट्वा	अभिवृष्य	वर्षितुम	वर्षयति
वूर्त्वा	परिवूर्य	वरितुं, वरीतुम्	वारयति
उत्वा	प्रवाय	वातुम्	वाजयति वापयति
शंसित्वा, शस्त्वा	प्रशस्य	शंसितुम्	शंसयति
शक्त्वा	प्रशक्य	शक्तुम्	शाकयति
शप्त्वा	संशप्य	शप्तुम्	शापयति
शान्त्वा, शमित्वा	प्रशम्य	शमितुम्	शमयति
शशित्वा	प्रशश्य	शशितुम्	शाशयति
शिष्ट्वा	विशिष्य	शेष्टुम्	शेषयति
शयित्वा	उपशय्य	शयितुम्	शाययति
श्रुत्वा	संश्रुत्य	श्रोतुम्	श्रावयति
श्लिष्ट्वा	आश्लिष्य	श्लेष्टुम्	श्लेषयति
श्वसित्वा	निश्वस्य	श्वसितुम्	श्वासयति

Verbal

धातवः	क्त	क्तवत्	शतृ	शानच्
सन्	सात	सातवत्	सन्वत्	सन्वान
साध्	साद्ध	साद्धवत्	साध्नुवत्	...
सिच्	सिक्त	सिक्तवत्	सिञ्चत्	सिञ्चमान
सु	सुत	सुतवत्	सुन्वत्	सुन्वान
सू	सून	सूनवत्	...	सूयमान
सृ	सृत	सृतवत्	सरत्	...
सेव्	सेवित	सेवितवत्	...	सेवमान
स्तु	स्तुत	स्तुतवत्	स्तुवत्	स्तुवान
स्तृ	स्तृत	स्तृतवत्	स्तृण्वत्	स्तृण्वान
स्तॄ	स्तीर्ण	स्तीर्णवत्	स्तृणत्	स्तृणान
स्था	स्थित	स्थितवत्	तिष्ठत्	तिष्ठमान
स्ना	स्नात	स्नातवत्	स्नात्	...
स्निह्	स्निग्ध स्नीढ	स्निग्धवत् स्नीढवत्	स्निह्यत्	...
स्पृश्	स्पृष्ट	स्पृष्टवत्	स्पृशत्	...

Derivations.

क्त्वा	ल्यप्	तुम्	णिच्
सनित्वा, सात्वा	संसन्य	सनितुम्	सानयति
साध्वा	संसाध्य	साद्धुम्	साधयति
सिक्त्वा	परिषिच्य	सेक्तुम्	सेचयति
सुत्वा	प्रसुत्य	सोतुम्	सावयति
सूत्वा	प्रसूय	सोतुम्, सवितुम्	सावयति
सृत्वा	अनुसृत्य	सर्तुम्	सारयति
सेवित्वा	प्रसेव्य	सेवितुम्	सेवयति
स्तुत्वा	संस्तुत्य	स्तोतुम्	स्तावयति
स्तृत्वा	आस्तृत्य	स्तर्तुम्	स्तारयति
स्तीर्त्वा	आस्तीर्य	स्तरीतुम्, स्तरितुम्	स्तारयति
स्थित्वा	प्रस्थाय	स्थातुम्	स्थापयति
स्नात्वा	प्रस्नाय	स्नातुम्	स्नापयति-स्नपयति
स्नेहित्वा, स्नेहित्वा	संस्निह्य	स्नेहितुम्	स्नेहयति
स्पृष्ट्वा	संस्पृश्य	स्प्रष्टुम्	स्पर्शयति

Verbal

धातवः	क्त	क्तवत्	शतृ	शानच्
स्पृह्	स्पृहित	स्पृहितवत्	स्पृहयत्	स्पृहयमाण
हन्	हत	हतवत्	घ्नत्	घ्नान
हस्	हसित	हसितवत्	हसत्	...
हा	हीन	हीनवत्	जहत्	...
हि	हित	हितवत्	हिन्वत्	...
हिंस्	हिंसित	हिंसितवत्	हिंसत्	...
हु	हुत	हुतवत्	जुह्वत्	...
हृ	हृत	हृतवत्	हरत्	हरमाण
ह्री	ह्रीण, ह्रीत	ह्रीणवत्, ह्रीतवत्	जिह्रियत्	...
ह्वे	हूत	हूतवत्	ह्वयत्	ह्वयमान

Derivations.

क्त्वा	ल्यप्	तुम्	णिच्
स्पृहयित्वा	संस्पृहय्य	स्पृहयितुम्	स्पृहयति
हत्वा	आहत्य	हन्तुम्	घातयति
हसित्वा	विहस्य	हसितुम्	हासयति
हात्वा	विहाय	हातुम्	हापयति
हित्वा	प्रहित्य	हेतुम्	हाययति
हिंसित्वा	प्रहिंस्य	हिंसितुम्	हिंसयति
त्वा	संहुत्य	होतुम्	हावयति
त्वा	संहृत्य	हर्तुम्	हारयति
त्वा	प्रह्रीय	ह्रेतुम्	ह्रेपयति
ा	आहूय	ह्वातुम्	ह्वाययति